No. १२४८ घ

Title न्यायसिद्धान्त मञ्जरी

Author जानकीनाथः

Extent २४ पत्राणि Age

Subject न्याय वैशेषिकम्

धर्मगुणावतीयमित्यनुभवति तदा तच्छ्रुत्वा द्वायस्य स्मरणादुपमितिरुत्पद्यते। इयं पृथिवीपदवाच्येति॥ एवं
गंधवती पृथिवीत्युक्ते इतरेतरेपि ज्ञेयं। तस्माद्यत्किंचिद्धर्मविशिष्टे विशिष्यापरिचितसंगतिकपदवाच्य
तारूपवाक्यार्थानुभवः करणं किंचिद्धर्मविशिष्टे तद्दर्शनाधीः सहकारिणी पदाच्च तत्फलमुपधर्मेण तद
स्फुरणा गुरुधर्मविशिष्ट एव सादृश्यादितानं ज्ञायते न तदा तदवच्छिन्नेव वाच्यता गृह्यते ज्ञायते परं तु संक्रमो
गौरवेण वाधादिति संक्षेपः॥ इति श्रीमह[illegible]चूडामणिकृतायां न्यायसिद्धांतमंजर्यामुपमान
परिच्छेदः॥ ॥ ॥ अथ शाब्दो निरूप्यते शाब्दप्रमितिकरणं शब्दः॥ शाब्दत्वं च शब्दात्प्रत्येमीत्य
नुभवसिद्धो जातिविशेषः॥ छ॥ जन्यपदधीजन्यत्वं व्यभिचारि अनुभवत्वाव्यापकजातिशून्यत्वे सति प
दविषयकत्वाव्यभिचारिजातिशून्यधीत्वं वा। सत्यंतं प्रत्यक्षानुमितिस्मृतीनां वारणाय॥ तत्र नादृशीनां

19

सि.मं. त्यपद्यत्वादीनां जातीनां सत्वात्। जातिशून्यत्वमनुभवत्वाव्यापकं जातिशून्यत्वं वाऽसंभवि अनुभ
वत्वादीनां [illegible] तदव्यापकं शाब्दत्वस्य सत्वात्। जन्यपदधीजन्यत्वव्यभिचारिजातिशून्यत्वमपि त
थात्वादृगनुभवत्वादीनां सत्वात्॥ पदधीजन्यत्वव्यभिचारि [illegible] अनुभवत्वापरजाति
शून्यत्वं च अनुमितावपि अनुमितित्वस्य भगवत्पदधीजन्यत्वाव्यभिचारित्वात्॥ अतस्त्वं दलितमु
पात्तं। उपमितावतिव्याप्तिवारणाय शून्यांतरम्॥ जात्यादावतिव्याप्तिवारणाय धीपदम्। सोयं शाब्दः १८
सकलजनानुभवसिद्धो दुरपह्नवः॥ तज्जनकत्वमपि तथा॥ आगोपालांगनमाचपंडितं चैत्रवाक्या[illegible]दम २
मर्थं प्रत्येमीति प्रतीतेर्जागरूकत्वात्। न च शाब्दो न प्रमाणमिति वाच्यं॥ एतद्वाक्यस्यापि शाब्दा[illegible]
ण्ये प्रामाण्ये आगतं शाब्दस्य प्रामाण्यं। अप्रामाण्ये आगतं शाब्दस्याप्रामाण्यमिति। केवलमनुमा

नविधया न्यथावेति विप्रतिपद्यंते॥ तत्रानुमानविधयेति वैशेषिकादयः॥ नैयायिकास्तु प्रयोगे वशब्दो
मानं॥ नचानुमानं शब्दस्यार्थाव्याप्यत्वात्॥ नहि पत्रशब्दस्तत्र घटानयनादिरूपोर्थः शब्दस्याकाशवृत्ति
त्वात्॥ घटादेश्च तद्वृत्तित्वात्॥ दृश्यते च व्याप्तिबुद्धिविधुराणामपि शब्दादर्थानुभवः॥ नचाप्यनुमिति
रूपफलस्याव्याप्तिधीजन्यत्वात्॥ प्रतिपत्तिवल्लौकिकाः अननुमितमसाक्षात्कृतं च श्रुतमिदं नैयायिके
ष्वप्ददृत्यलमिति विस्तरेण॥ ननु पदिस्वातंत्र्ये एव शब्दो मानं तदा घटमानयेत्यतः पामराणामप्यर्थप्र
त्ययः स्यादिति चेन्न॥ शक्तिग्रहस्यापि सहकारित्वात्॥ पामराणां च घटादिपदे शक्तेरग्रहात्॥ अथ के
यं शक्तिः॥ अभिधानामपदार्थांतरं संकेतग्राह्यमिति मीमांसकाः॥ नैयायिकास्तु॥ आवश्यकत्वात्सं
केत एव अभिधा न तु पदार्थांतरं मानाभावात्॥ स च संकेतोऽस्माच्छब्दादयमर्थो बोधव्य इत्याकारिकेच्छा॥
हते वपामरादिसंकेतिता अपि शब्दा अभिधायिकाः स्युरिति चेन्न॥ नहि संकेतमात्रमभिधा किं त्वीश्वरसं

सि॰मं॰८ केनः॥ न चापभ्रंशस्तितेस्तोस्ति मानाभावात्। कथं तर्हि ततोऽन्वयबोध इति चेच्छक्तिभ्रमादिति गृहाण॥ कथं
तर्हि पामरादीनामीश्वरमविदुषां मीमांसकानां चार्थप्रत्ययः शाब्दादिति चेदुच्यते॥ न तावदीश्वरसंकेतत्वे
न तद्ग्रहः कारणं किंतु संकेतत्वेनास्ति च तेषामपि तथा ज्ञानं। आधुनिकसंकेतितानां चैत्रादिशब्दानां का गति
रिति चेत्॥ द्वादशेऽहनि पिता नाम कुर्यादिति सामान्यतस्तस्यापीश्वरसंकेतितत्वमिति गृहाण॥ स्यादेतत्॥ सो
२० ऽयं संकेतः कथं ग्राह्यः उपमानादिति चेन्न। तस्य वाक्यार्थज्ञानमूलकत्वात्। तस्य च शक्तिग्रहमूलकत्वात्॥
२० उच्यते॥ प्रथमतः शक्तिग्रहो व्यवहारात्। तथाहि॥ घटमानयेति केनचिदुक्तः कश्चन तदर्थं प्रतीत्य घटमा २०
नयति तच्चोपलक्ष्य मार्गो बालः तया क्रियया तस्य प्रयत्नमनुमिनोति तेन च घटानयनगोचरप्रयत्नेन तस्य ता
नमनुमिनोति स्वप्रयत्ने तेन तथा निश्चयात्। ततस्तद्धेत्वाकांक्षायामुपस्थितत्वाच्छब्दमेव कल्पयति। तदनन्तरं
च घटादिपदानां प्रत्येकमावापोद्वापेन घटपदं घटधीजनकमिति कल्पयति। कल्पते च तस्मिन्नेति प्रसंगमंगाय

तज्जननानुकूलं संकेतरूपं संबंधं कल्पयतीति किमनुपपन्नं ॥ तदनंतरं च क्वचिद्व्यवहारात् ॥ क्वचि
दुपमानात् । क्वचित् शास्त्रात् ॥ क्वचित् व्याकरणात् क्वचित् कोषादिति संक्षेपः ॥ स्यादेतत् । दृष्टो व्यव
हारं पश्यता संकेतो ग्राह्यः ॥ तर्ह्येव कथं संकेतग्रहः अमपोर्व्यवहारात् इति चेन्न । अनवस्थापत्तेः अनादि
त्वादियमिष्टैवेति चेन्न । सर्गादौ तदसंभवात् ॥ सर्गादिरेवासिद्ध इति चेन्न । कार्यद्रव्यानधिकरणकार्याधि
करणकालस्य खंडप्रलयतया प्रसिद्धस्यागमसिद्धत्वात् । तु [illegible] । सर्गादौ भगवानीश्वरः शरीरद्वयं परिगृ
ह्य तथा व्यवहरति । ततस्तद्व्यवहाराद्बालः पूर्ववत् संकेतं गृह्णातीति किमनुपपन्नं । ईश्वर एव किं मानं इति
चेत् सर्गादौ व्यवहारान्यथानुपपत्तिरेव । ननु पूर्वसर्गसिद्धसर्वज्ञत्वान्मन्वादय एव व्यवहारप्रवर्तका इति न वः
संतीति चेन्न । तेषां सर्वज्ञत्वे मानाभावात् । कल्प्यव्यवहारान्यथानुपपत्तिरेव मानमिति चेन्न । पूर्वसर्गव्यवहा
रस्यैवमप्यनुपपत्तिः ॥ तत्राप्यन्यकल्पनामिति चेन्न ॥ प्रतिसर्गमन्यसंतत्या भावकल्पनापां गौरवात् ॥ अस्त्वे

सि॰म॰ कएवसर्वत्रमूलमितिचेन्न। सएवास्माकमीश्वरइतिदिक्॥ स्यादेतत्॥ यदिशक्तिग्रहः सहकारितदा
घटशब्दात्पटप्रत्ययः किन्नस्यात्। अस्तिचैतस्यशक्तिग्रहोघटे। अथयःशब्दोयत्रगृहीतशक्तिकः तदर्थंबोधयतीतिचे
न्नर्हिकाश्यांपागौरस्तीतिवाक्याद्देशान्तरीयस्यगोः प्रत्ययोनस्यात्। नहितस्यकाशीस्थापांगावशक्तिग्रहोस्तितस्यारे
११ वाप्रतीतेः॥ अत्रमीमांसकाः॥ गवादिपदानांगोत्वेशक्तिः कथंतर्हिव्यक्तिलाभइतिचेत्तदाक्षेपादित्याहुः॥ ननुको
२१ यमाक्षेपः तस्यार्थापत्तिरेवाक्षेपः॥ गोत्वंहित्वाश्रयंविनाअनुपपपन्नमितितमाक्षिपतीतिभट्टाः तन्न॥ अनुप २१
गो॰ पत्तिज्ञानमन्तरेणापिगौरस्तीत्यतोगोत्वविशिष्टव्यक्तिप्रतीतेः॥ तस्मात्समानवित्तिवेद्यत्वमाक्षेपइतिगुरवः॥ यावती
हिजातिधीःव्यक्तिंविषयीकरोतीतिव्यक्तेर्लाभः॥ इदमेवकथमितिचेत्जातिमानमाभिरुपाएवव्यक्तिबोधकत्वा
दितिप्रदाराः॥ यद्वाजातिशक्तिरेवव्यक्तिबोधयति नचान्यशब्दशक्त्याअन्यबोधनेऽतिप्रसंगः॥ गोत्वशक्तं
पदंगोत्वविशिष्टंबोधयतीत्यनतिप्रसंगात्। अन्यथानुपपत्त्यानथैवकल्पनादिति॥ तदपरेनक्षमन्ते॥ तथा
तः

सति गोत्वमस्तीत्यतोऽपि गोत्वविशिष्टप्रत्ययापत्तेः॥ तस्माद्गोत्वविशिष्ट एव शक्तिः। न चोक्तदोषः गोत्वसामान्यलक्षणा
पा[illegible] सकलस्य गोरुपस्थितौ सर्वत्रैव गवि शक्तिग्रहसंभवात्॥ अस्तु वा एकैव गवि शक्तिग्रहः॥ न चान्यगोबो
धानापत्तिः अन्यशक्तिग्रहादन्यशक्तिबोधनेऽतिप्रसंग इति वाच्यं गोत्वविशिष्टशक्तिग्रहो गोत्वविशिष्टप्रत्याप
क इत्येवमनतिप्रसंगादिति संप्रदायविदः। न व्यक्तिमात्र एव शक्तिर्न तु गोत्वेऽपि गौरवात्। न चैवं गोत्वप्रत्ययाना
पत्तिः गोत्वावच्छेदेन शक्तिग्रहस्य गोत्वविशिष्टप्रत्ययापकत्वादिति तत्त्वं॥ स्यादेतत्। यदि गोत्वविशिष्टे शक्तिस्त
दा गौः शुक्ल इत्यतो गोशुक्लयोरभेदप्रत्ययो न स्यात्। तस्यान्वयरूपस्या[illegible]शक्यत्वात्॥ न च शक्यादशक्यमपि
भासते अतिप्रसंगात्॥ उच्यते। गोशक्तं पदमेव गवान्वये बोधयति॥ न चाशक्यबोधने घटमपि बोधयेदिति वाच्यं।
गोशक्तं हि पदं गवान्वयबोधजनकं॥ न च घटो गवान्वयी येनातिप्रसंगः स्यात्॥ [illegible]। अन्वयविशिष्टे शक्तिग्रहा
दन्वयेऽपि शक्तिरेवेत्याहुः॥ तन्न[illegible]। अन्वयस्यान्यलभ्यत्वात्। अनन्यलभ्यस्य च शब्दार्थत्वात्॥ अन्यथा लक्षणोच्छेदा

सि॰मं॰ पर्त्तेः॥ प्रभाकरास्तु। कार्यत्वान्वितेपदानांशक्तिः॥ तथाहि। प्रयोजकवाक्यश्रवणानन्तरं प्रयोज्यस्यप्रवृत्तिमुप
लभमानोबालः॥ तत्प्रयोजकतयाकार्यताविशिष्टज्ञानमनुमिनोति स्वप्रवृत्तौतेनकार्यत्वविशिष्टज्ञानस्यहेतु
त्वावधारणादतस्तद्धेत्वाकांक्षायामुपस्थितत्वाच्छब्दमेवतथावधारयतिततः तन्निर्वाहिकांपदशक्तिं चानकार्यत्वा
न्वितेशब्दत्वावच्छेदेनकल्पयति। तदनुचावापोद्वापाभ्यां घटादिपदेशक्तिं गृह्णानः प्रथमकल्पनानु
२२ रोधात्कार्यत्वान्वितघटादौशक्तिंकल्पयति ननुकेवलघटादावाद्यव्युत्पत्तिविरोधात् इत्थंचयत्र २२
कार्यतावाचकपदसमभिव्याहारोनास्तितद्वाक्यमर्थवादरूपंमूकमेव। व्यवहारस्त्वसंसर्गाग्रहात्
ननुसर्वेषांपदानांकार्यतान्वितवाचकत्वात् तद्वाचकपदसमभिव्यवहारोनास्तीत्यसंगतं। अत्रसंगतं
चार्थवादस्याप्रामाण्यमितिचेदुच्यते। द्विधाहिपदशक्तिः॥ अनुभाविकास्मारिकाच। तत्रानुभाविका

कार्यत्वान्विते स्मारिकावृजातौ ॥ तथा च घटादिपदं घटादिपदात् कार्यत्वस्यानुपस्थितौ कथं तदन्वितबोधं जनयेत्
कार्यत्वान्वितबोधेन तदुपस्थितेरपि हेतुत्वादिति नार्थवादस्याप्रामाण्यमिति चेत् तन्न । आवापोद्वापाभ्यां लघुत्वात् ॥
घटादिमात्र एव शक्तिग्रहः ननु कार्यत्वांशेऽपि क्लृप्तत्वात् । प्रथमग्रहे लघुत्वं वालस्यानुपस्थितमिति चेत् ॥
प्रथमं न हि कार्यत्वांशेऽपि शक्तिग्रहो क्लृप्तपदाच्च तदुपस्थितं तदा घटमात्रे शक्तिग्रहो क्लृ सा बाध्यता गौरवात् ॥
अथ एवं चरमग्रहे तौ घटमात्रे शक्तिकल्पना कथं प्रथमग्रहे तं बलवन्तं कार्यतान्वितशक्तिकल्पनां बाधितुमि
ष्टामिति चेन्न ॥ प्रथमकल्पनायां बलत्वासिद्धेः ॥ न हि प्रथमग्रहत्वमेव बलवत् । चेद्गतारकादिस्वल्पतायाः प्र
प्रथमप्रतीतायाः शास्त्रजमहत्त्वप्रतीत्या बाधा नापत्तेः ॥ चरमकल्पनायां लाघवसहायतमा बलवत्त्वाच्च ॥ किं
चैवं काव्यादिभ्योऽनुभवसिद्धोऽन्वयानुभवो न स्यात् ॥ न चासंसर्गाग्रहमात्रं तत्र न तु संसर्गज्ञानुभव इति वाच्यं ॥

वेदमानपेक्ष्यत्वापत्तितदापत्तेः ॥ तथा च गतं शब्दप्रामाण्यप्रत्याशया ॥ किं चैवं अर्थवादरूपाणां श्रुतिस्मृतीति
हासपुराणादीनां प्रमाण्यं स्यात् ॥ तथा च वैस्पष्टपदहसितं मिश्रैः प्रसिद्ध एव लोके ऽस्मिन्नवुद्धवंधुः प्रभाक
23 रइति तस्मादेववदनप्रतारकः कश्चिद्धूर्त्तो वात्यासत्लिपिशाद्दशाम्यां प्रभाकर इति नहीनो लोकैरिति पुत्कनुस्म
२२ रुपामः ॥ ननु पदे शक्तिग्रहः के सहकारी तदा गंगापदात्तीरप्रत्ययो न स्यादिति चेन्न ॥ शक्तिर्हि न तत्वेन प्रयोजिका
किंतु वृत्तित्वेन । अस्ति च गंगापदस्य तीरे वृत्तिर्लक्षणैव । अथ केयं लक्षणा नाम ॥ शक्यादशक्योपस्थिति
र्लक्षणेत्येके ॥ तन्न ॥ उपस्थितिहेतुर्हि वृत्तिर्न तु सैव । अशक्ये तात्पर्यं लक्षणेत्यन्ये । तन्न ॥ शक्तेरपि तत्त्वापत्तेः २२
अन्वये तात्पर्यस्य लक्षणात्वापत्तेः ॥ किं च तात्पर्यनिर्वाहिका हि वृत्तिर्न तदात्मिकैव ॥ उच्यते ॥ स्वशक्यसं
धी०२ बन्धो लक्षणा ॥ अस्ति हि गंगापदशक्यः प्रवाहविशेषः ॥ तत्संबंधस्तीरे इति सा च लक्षणा द्विविधा ॥ गौणी शु
द्धा च ॥ तत्र शादृश्यात्मकः शक्यसम्बन्धो गौणी यथा गौर्वाहीक इति तदन्या शुद्धा यथा आयुर्घृतमिति । ननु

रन्वयः किं तु विभक्तिरर्थे नामार्थयोरे

पद्यते एव हन्ति कथं तर्हि राजपुरुषपदादौ षष्ठ्यर्थलाभः॥ न हि राजपदं सम्बन्धशक्तम्॥ अथ सम्बन्धो न्व
यविधया भासते नीलो घट इत्यत्राभेद इव इति चेन्न। राजा पुरुष इत्यत्रापि तदापत्तेः॥ अथ नामार्थयोरभेदे
नैवान्वयो न त्वन्यथा तथैव व्युत्पत्तेः॥ राज्ञः पुरुष इत्यत्र तु न नामार्थयोरिति चेत्तर्हि राजपुरुष इत्यत्र कथं तयो
रन्वय इति स्वयमेव विभावय। अथ सम्बन्धे लक्षणैवेति चेन्न॥ तथापि राजपुरुष [illegible]॥ संबंधः ८
शक्ति विरहे लक्षणायाप्ययोगात्। स्वशक्यसम्बन्धो हि लक्षणोच्यते। उच्यते॥ राजपदं राजसम्बन्धि
लक्षकं तथा चाभेदे नैव पदार्थयोरन्वयः॥ न चैवं कर्मधारयापत्तिः॥ समासपूर्वदशायां पदयोस्तत्त्वा
र्थत्वाभावात्। अन्ये तु लुप्तषष्ठ्यैवान्वयं बोधयन्ति। षष्ठीलोपमजानतस्तु तत्रान्वयबोधस्य पः शक्तिभ्रमात्॥
राजपदं लक्षणायोति स्वीचक्रुः॥ वैयाकरणास्तु समासस्य शब्दसमुदायविशिष्टार्थे शक्तिरेव॥ न वै
तथापि राजपुरुष इति वदन्नन्वयः स्यादिति तद्दोषता दवस्थात्। अथ राजपुरुषात्मकसमुदाय एव राज
संबंधिपुरुषलक्षणेति चेन्न २

वं राजपदशक्तिमविदुषोपि राजपुरुषादिपदान्वयप्रत्ययः स्यादिति वाच्यं ॥ समस्तशक्तिग्रहो ह्यनु
शासनात् ॥ न चावयवशक्त्यग्रहे ऽनुशासनग्रहसंभवतीति ॥ तच्छक्तिग्रहस्य समुदायग्रहे हेतुत्वादित्याकु
लत्वं ॥ अवयवलक्षणयैवोपपन्नौ समुदायशक्तौ मानाभावात् ॥ तदुक्तं जहत्स्वार्थातु तत्रैवपत्र रूढिविरोधिनीति ॥
२४ तस्मादन्यथोपपन्नौ समुदाये शक्तिरयुक्तेति संक्षेपः ॥ स्यादेतत् । मास्तु तत्पुरुषे शक्तिर्बहुव्रीहौ तु चित्रगुमानयेति २४
चित्रगुशब्दे चित्रगोस्वामिनि शक्तिरावश्यकी ॥ न हि तत्र लक्षणया निर्वाहः ॥ तथा हि किं गोपदं गोस्वामिलक्षकं चित्रप
दं वा चित्रस्वामिलक्षकं । नाद्यः ॥ न हि चित्रत्वस्यात्र गवान्वयः संभवति ॥ तस्य पदार्थैकदेशत्वात् ॥ अत एव नान्त्योपि ग
वानन्वयापत्तेः ॥ अथ गोपदं चित्रगोस्वामिलक्षकं चित्रपदं तु तात्पर्यग्राहकमिति चेन्न । चित्रपदं चित्रगोस्वामिलक्षकं गो
पदं तात्पर्यग्राहकमिति विनिगन्तुमशक्यत्वात् ॥ तस्माद्विनिगमकाभावात् ॥ समुदाये शक्तिरेवेति केचित् ॥ ॥ अत्रोच्यते ॥

विनिगमकाभावाद्स्तु पदद्वयेऽपि लक्षणा। ननु समुदाये शक्तिरन्यलभ्यत्वात्। मीमांसकास्तु समुदाय एव लक्षणा॥ न च
समुदायस्य शक्याभावाल्लक्षणानुपपत्तिः॥ स्व बोध्यसम्बन्धो हि लक्षणा॥ स्ति च वाक्यस्यापि विशिष्टबोध्यम्। अन्यथा
कागतिर्गभीरायां नद्यां घोष इत्यादौ न हि नदीपदं तीरलक्षकं गभीरायामित्यस्यानन्वयापत्तेः॥ न हि तीरं गभीरं॥ नापि गभी
रपदं नदीतीरलक्षकं। नद्यामित्यनन्वयापत्तेः। न हि तीरं नदी तस्मादनन्यगतिकतया वाक्यमेव गभीरनदीतीरलक्षक
मित्याहुः॥ अत्रोच्यते॥ वाक्यं न हि विशिष्टार्थबोधकं तद्बोधक तावच्छेदकशक्तेरभावात्। अत स्तत्र बोध्यसम्ब
न्धो लक्षणेति रिक्तं वचः। किञ्च गभीरायां नद्यामिति विभक्त्यन्तभागस्य न तीरे लक्षणा॥ तदाधारताप्रत्ययानापत्तेः॥
नापि गभीरायां नदीति भागस्याबोधकत्वात्॥ बोधकत्वे वा लक्ष्ये विभक्त्यर्थानन्वयापत्तेः॥ न हि स भागः प्रकृतिर्येन
तदर्थे विभक्त्यर्थान्वयः स्यात्। गभीरायामिति समस्तनापत्तेश्च॥ अथ विभक्त्यन्तस्यैव गभीरनदीतीराधारत्वे लक्ष
प्रत्ययानां प्रकृत्यर्थगतस्वार्थबोधकत्वात्। २

सि॰मं॰ कत्वमितिचेन्न॥ अशक्तत्वात्॥ तस्मात्पदद्वयस्य विनिगमकाभावात् विशिष्टनदीतीरेलक्षणा। नचैकपदवैय
र्थ्यं परस्परस्य परस्पर्तात्पर्यग्राहकत्वात् इति संप्रदायविदः॥ विस्तरस्तु अस्माकं मणिमरीचिनिवन्धे तात्पर्य्य
25 दीपिकयोरनुसंधेयः॥ रुपकुंभमद्धे पिप्पलीत्यादावपि उत्तरपदलक्षणायैवोपपन्नो न शक्तिरुपपत्तेः समन्वयत्वात्॥
समाहारद्वन्द्वे पाणिपादमित्यादौ पाणिपदं पाणिप्रतियो गिकं पादपदं तत्पादसमाहारं लक्षयति। ननु 24
24 पाणिपादसमाहारे शक्तिः समाहारश्चतुल्यवदेकक्रियान्वयित्वरूपं साहित्यं। सेनावनादिवदयेच्छा बुद्धिविशेष
विषयत्वं वा। नन्वेवं पाणिपादं वादयेत्यनन्वयः समाहारे वादनकर्मत्वाभावात्। इति चेन्न। परंपरयान्वयकर्मत्वान्वयपा
दित्येके॥ समाहारोत्तरविभक्त्यर्थकर्मत्वादेः समाह्रियमानएवान्वयः॥ समाहारसामानाधिकरण्येनवापदव्युत्प
त्तिवैचित्र्यादित्यन्ये॥ पाणिपादं वादयेत्यत्र पाणिपादमात्रप्रतीतेर्नसमाहारे लक्षणा शक्तिर्वा। नचैवं द्विवचनाप
त्तिरसाधुत्वात्। उत्तरेतरसमाहारसंत्वात्तु नदीद्वयादिवत्यादिमाषिकेयैवेतितत्वानुभाविका॥ इतरेतरद्वंद्वे तु धवखदिरावित्ति

त्स।

स्वरूपद्वयप्रतीतेर्नलक्षणा शक्तिर्वा। मीमांसकास्त्वत्रापि धववरवदि। साहित्याश्रयेलक्षणानदाहुः।। साहित्ये द्विवचनवद्बहु
वचनेद्वन्द्वसमासेवेति। साहित्यंचतुल्यवदेकक्रियान्वयित्वं।। अतएवपत्युर्कर्तृकंतदनयासहेति अत्रपत्न्याःसहभाव
मात्रेगम्यतेनतु [illegible] साहित्यं। पाणादौपत्न्याअनुमितिद्वारान्वयोनतुल्यवदन्वयः।। इत्याहुः।। नीलोत्पलमित्या
दौनीलाभेदस्यान्वयविधयैवाभासनोपपत्तेः। कर्मधारयेनशक्तिर्नवालक्षणा। अतएवतत्पुरुषात्कर्मधारयोल
घीयान्। तत्रहिपूर्वपदेसम्बन्धिलक्षणेत्युक्तं।। नञ्तत्पुरुषेप्यघटःपटइत्यत्रघटपदंघटसम्बन्धिपरं नञ्पदंचान्योन्या
भावेशक्तमेवसंसर्गाभाववाचकं नञ्नामोन्याभावेशक्तमितिचेन्न।। लाघवेनविनिगमनाभावेन चाभावमात्रएव
नञ्शक्तत्वावधारणात्। ननुनघटःपटइतिवदभावघटयोरन्वयोपपत्तेर्नघटपदेपिलक्षणेत्युक्तमितिचेन्न।। नामार्थ
योर्भेदान्वयस्याव्युत्पन्नेः। कथंतर्हिनघटःपटइत्यत्रान्वयइतिचेत्। घटपदस्यघटप्रतियोगिकेलक्षणायेतिगृहाण।।
प्रयापान्वावच्छेर्थेलक्षणा। ननुस्तुविभक्तौनलक्षणा इतिचेत्तर्हि कथंषष्ठीतः कर्मत्वाद्यन्वयः कथंवाएकस्यांदा
मा

सि॰ मं॰ राइति बहुवचनं आनुशासनिकीयं लक्षणाद्दृष्टेवेति चेन्नुत्वं तदिदमाहुः॥ निपातप्रयोगादिके चिद्व्यपाइति तथा
पि नञर्थघटयोः कथमाश्रयाश्रयिभावेनान्वयः॥ ननु नञ्खलु प्रथमषष्ठीसमरणादिति चेन्न॥ षष्ठीलोपसजानतोपितते
र्थश्रयणात्॥ नञ्पदमभाववल्लक्षकमिति चेन्न॥ घटस्याभावेऽनन्वयापत्तेस्तस्यपदार्थैकदेशत्वात्॥ मैवं॥ संबंधिकु स३
२६ स्थले एकदेशेऽप्यन्वयस्वीकारात्॥ यथा चैत्रस्य पितेत्यादौ चैत्रस्य जनकत्वेऽन्वयः॥ त्वन्मते तु समुदाय एव तत्पदा २६
र्थान्वयः परस्परासम्बन्धेनेत्याहुः॥ पुत्रन्त्वाभाववल्लक्षकत्वमेवान्यथाऽघटपटमित्यत्र समानविभक्तिकतानुपप
त्तेः॥ परेतु निपातस्थलेऽन्यैव व्युत्पत्तिरिति। घटतदभावयोः प्रतियोग्यनुयोगिभावेनान्वयोपपत्तौ न घटादिपदे लक्षणा।
चंद्र अत एव मुखमित्यादौ चंद्रइवार्थयोर्भेदेनान्वयः॥ अत एव घटो नास्तीत्यत्रापि घटतदभावयोरन्वयो निष्कलंकइत्या
वद्व हुः॥ तन्न॥ मानाभावात्॥ चन्द्रमिव मुखमित्यादौ चंद्रपदं तत्सदृशलक्षकं इवेतात्पर्यग्राहकं॥ अत एव चंद्रमिव मुखं
२

नामार्थ२ पदं

पश्चाम्भिरन्यत्र द्वितीयाव्ययात् तदनुपपत्तेः॥ अस्तु वा षष्ठ्यर्थ एव विभक्तौ लक्षणा अनुशासनानुग्रहात्। घटो नास्तीत्यत्रा
पि तथैव दोषः॥ अन्यत्र तु घटो नास्तीत्यत्र घटस्याभावोऽस्तीति नार्थः॥ तथा सति भूतले घटो नास्तीत्यस्याप्यापत्तेः अभाव
स्यैकत्वादिति। किन्तु भूतलवृत्त्यभावप्रतियोगी घटोऽस्तीति तन्न॥ घटः क्वाप्यधिकरणे कांक्षापत्तेः कथं न हि घटो नास्ति इत्या
दीति चेत्॥ भावनाञ्चाप्यभावप्रतियोगिनि संख्यान्वयात्॥ कथमिति चेत्। तथैव प्रतीतेरिति गृहाण। परन्तु इदं भूतले नास्ती
त्यत्र का गतिः॥ जातिवृत्तित्वाभावस्य सत्तायामसत्त्वात्॥ जातिसमवेतत्वस्य वाप्रसिद्ध्या निषेद्धुमशक्यत्वात् इति चेत्॥
या गतिर्या जातिर्न सत्तावृत्तिरिति वाक्यस्यापो ग्यमेवेदं वाक्यं वृत्तिपदस्य साक्षात्सम्बन्धावच्छिन्नवृत्तिपरमिति तु तुल्यं॥ त
थापि नञर्थो निषेधो घटे कथमन्वेतीति चेन्न॥ निपातातिरिक्ते नामार्थस्य हि नामार्थेनाभेदेनान्वयो न नामार्थमात्रस्ये
ति प्रतीपत्तिः। स्यादेतत्। घटो नास्तीत्यादौ भेद एव प्रतीयते भूतलेन घट इत्यत्र वृत्त्यन्ताभाव एवेत्यत्र किं नियामकमधि
त्वे रूपाख्यातनिषेध एव घटे प्रतीयते न पचति चैत्र इत्यत्रेव नातो द्विवचनानुपपत्तिः॥ नन्वेवं जातौ सत्ता नास्ती ७

गं गातीरयोः संबन्धस्यानुपपत्तिरानादिचेद्दुरादिनापहृतात्॥ नापि तत्तात्पर्यग्राहकत्वं
तात्पर्यव्याप्यान्तरेपि तौ [illegible] तेह्यहात्
शि॰मं करणवाचकपदे सप्तमीविभक्तिरित्यन्नाभाववोधे तत्र॥ प्रतियोग्यनुयोगिपदयोः समानविभक्तिरन्योन्याभाववोधे इति
चेन्न। न पचति चैत्रो मैत्रस्य न धनमित्यत्र सप्तम्यभावात्॥ अलघु पचतीत्यत्र समानविभक्तेरभावाच्च॥ अत्राहुः॥ नञ्
विनिर्मोके यत्र प्रतियोग्यनुयोगिपदयोरभेदान्वयवोधे साकांक्षता तत्रान्योन्याभाववोधकत्वमन्यत्र बोधकमिति व्युत्प अमर
त्तिः अस्ति च न घटः पटइत्यत्र नञा सत्वे घटपटयोरभेदान्वयवोधे आकांक्षा अतस्तत्रान्योन्याभावप्रत्ययः॥ भूतलेन २७
२७ घटइत्यत्र तु नञ्विनिर्मोके नाभेदान्वये आकांक्षा इति तत्र संसर्गाभावप्रत्यय एवेति संक्षेपः॥ व्यञ्जना च न वृत्त्यन्तरं
२७ लक्षणयैव तदर्थसिद्धेः॥ नन्विदमयुक्तं। तथाहि। लक्षणायां मुख्यार्थे इतरान्वयानुपपत्तिर्वीजं। न च व्यञ्जनायां सर्व
गङ्ग३ त्रास्ति गङ्गायां घोषः सीत्यादौ तदभावात्। अतो वृत्त्यन्तरं मास्थेयमिति चेत्॥ किमिदं लक्षणावीजत्वं नतावञ्जनकत्वं गंगातीरयोः सं
वन्धस्यानुपपत्तिरानाजन्यत्वात्॥ नापि तज्ज्ञापकत्वमनुपपत्तिं तानमन्तरेणापि तद्ग्रहात्॥ अथ लक्षणाजन्यशाब्द
वोधे सहकारित्वं न दिति चेन्न॥ यष्टीः प्रवेशयेत्यत्र व्यभिचारात्॥ तात्पर्यविषयानुपपत्तिस्तत्राप्यस्तीति चेन्नहि तात्पर्या
गङ्गा गङ्गायां घोष इति चोक्ता तत्पर्यायानः स न्नुते [illegible]

नुपपत्तिरेव लक्षणाबीजमस्तु सा चइहाप्यस्ति स्यादेतत्। गंगायां घोष इत्यादौ लक्षणाप्रयोजनं शैत्यपावनत्वादिप्रती
ध्याश तिः न च तत्प्रतीतिर्लक्षणासाध्यप्रयोजनाभावात् लक्षणायाएव प्रयोजनवत्त्वनियमादिति चेन्न।। लक्ष्यप्रतीतेरेव प्रयो
जनत्वात्। तथापि प्रयोजनान्तरं तत्र नास्तीति चेत्ततः किं लक्षणायाहि प्रयोजनवत्त्वेन नियमो न तु लक्ष्यप्रतीत्यतिरिक्त
प्रयोजनवत्त्वेन गौरवाद्प्रयोजकत्वात् च। स्यादेतत्। नानार्थस्थले तदर्थविशेषप्रत्यये प्रकरणादिकं निर्णा
यकं। तथा च पत्रशकारणादिशक्त्यार्थान्तरं प्रतीयते तत्र नाभिधामूलं सहकार्यभावात्। नापि लक्षणा प्रयोग
त्सिद्धत्वप्रसरेरोतिचेन्न।। प्रकरणादीनामननुगततया सहकारित्वानुपपत्तेः।। तात्पर्यग्राहकत्वेनैषामनुग
म इति चेन्न हि लाघवात्तात्पर्यमस्तु सर्वेहाप्यस्ति।। स्यादेतत्। लक्षणाहि पदवृत्तिरिय न तु पदतदेकदेशवाक्य
रवा नार्थसंग्याघाकाराश्रिते त्याश्रयमेदाद्रुदइति चेन्न। अस्ति हि तदेकदेशाद्यो ह्यर्थविशेषतात्पर्यग्राहका
न तु तत्प्रतिपादकाइति। स्यादेतत्। लक्ष्ये तात्पर्यता नं लक्षणासहकारि न तु संग्याघे तात्पर्यग्राहो हो। निपूतः

सि० मं० स्वार्थरवि तकाव्यादौ तात्पर्याविषयस्यापि व्यंग्यस्य चमत्कारादीति चेन्न ॥ व्यंग्यतात्पर्यग्रहस्यानपेक्षापां गंगायां घोषइ
त्यादौ शैत्यादिकमेव प्रतीयते न तु केशवालुकादिमत्त्वामिति नियमो न स्यात् । वासनाविशेषपरिपाकान्नियम इति चेत्तर्हि
२८ ल्लक्षणास्थलेपि स नियमकोस्तु कृतं तात्पर्यग्रहेणेति ॥ वस्तुतो न व्यंजनागच्छगच्छतीत्यत्र मा गाइत्यत्रास्यास्तात्पर्येणु
न्नीयते संभाव्यते वा नु तु मा गाइति निर्णीयते कृतं हृत्यन्तरेण ॥ स्यादेतत् ॥ पदि पतेश्च वहृत्तौ कथं तर्हि प्रजपतीत्यादौ प्र
राम कर्षबोधः ॥ न हि प्रादेः प्रकर्षादौ शक्तिर्द्योतकत्वात् ॥ न च लक्षणा शक्त्यत्वात् ॥ उच्यते । जपतिरत्र प्रकृष्टजपलक्षकः प्रशब्द राम
२८ स्तात्पर्यग्राहकस्तत्त्वमेव द्योतकत्वं न च जपः शाक्य एव प्रकर्षोऽस्त्विति वाच्यं जपमात्रं हि शक्यं न तु विशिष्टजपस्त २८
ताद्रूपः ॥ शाक्याद्भ्यन्नरूपेणाज्ञाने भवति लक्षणेति ॥ ननु प्रादेरेव प्रकर्षादौ न कथं शक्तिः कल्प्यत इति चेन्न ॥ अनन्यलभ्य
त्वात् ॥ इति गदाधराः ॥ व्यतिसेइत्यत्र सुत्सुप्रो धातुरेवार्थप्रत्यायति धातुलोपमाजानतस्तत्रार्थप्रत्ययाभावात् ॥ इति सं
क्षेपः ॥ स्यादेतत् । व्याख्यातस्यैतावद्यातन्नेव शक्यः पचतीत्यस्य पाकं करोतीति विवरणात् ॥ व्यवहारवृद्धिवरणादप्रि

वैशक्तिर्नियतत्वात्। तथा च रथो गच्छतीत्यत्र न मुख्यप्रयोगः॥ रथादीनामचेतनतया गमनानुकूलप्रयत्नशून्यत्वात्॥ नापि ल
क्षणा विभक्तौ लक्षणानंगीकारात्॥ अन्यथा व्यत्ययानुशासनवैयर्थ्यादतः सिद्धं हृत्पन्ने रोगोति चेन्न॥ व्यत्ययानुशासनबला
द्विभक्त्यर्थेऽप्यस्मिन्न लक्षणा न त्वन्यत्रापि इह च न विभक्त्यर्थे लक्षणा किन्तु व्यापारे दृश्यते विभक्त्यर्थेऽप्यनुशासनकी लक्ष
णा यथा रूढियोगे षष्ठ्याः कर्मत्वेन कर्मत्वमपि सम्बन्धः स च शक्त्या स्वेति न लक्षणा कर्मत्वप्रकारकबोधस्य तत्पाठं विना संभवात्
न व्यकारको बोधो न भवत्येव॥ किन्तु सम्बन्धत्वप्रकारक इति चेन्न॥ अनुशासनवैयर्थ्यात् द्वितीयायाः साधुत्वज्ञापकमनु
शासनमिति चेन्न॥ निष्ठादिवर्जनवैफल्यात्तत्र द्वितीयायाः साधुत्वज्ञापकं तदिति चेन्न॥ कृत्ययोगे विकल्पविधानवै
यर्थ्यात्। अनिषेधे नैव द्वितीयोपपन्नौ पाक्षिकषष्ठ्यर्थं तदिति चेन्न। सम्बन्धत्वप्रकारकबोधजनिका पाश्शेषवचनता
देव सिद्धेः॥ निष्ठादियोगे शेषषष्ठ्याः असाधुत्वज्ञापकं तदिति चेन्न॥ तद्योगेऽपि ताहृश्या वहुदर्शनात्॥ किन्तु यदि विभक्तौ
न लक्षणा कथं तर्हि भाविनयं जानातीति विषयता पाक कर्मत्वशक्ता द्वितीया विषयनैव द्वितीयार्थः त्रिपाजन्यफलसा

सि॰मं॰

राम

२८

२५

लिपेहूपालबुत्वादिति चेन्नहि ग्रामं गच्छतीत्यत्र कुतः कर्मत्वप्रतीतिर्लक्षणां विनेति विभावनीयमायुष्मता॥ आ
ख्यातत्रापि तृत्स्वन्तरमिति चेन्न। लूपृत्वहन्यैवोपपन्ने॥ मीमांसकास्तु अनुकूलव्यापारमात्रमाख्यातार्थः॥ स्थो
गच्छतीत्यादौ मुख्यप्रयोगस्तु उद्गस्मादुः॥ तन्न॥ पतनत्वस्य जातित्वेन तस्यैव शक्यतावच्छेदकत्वात्। नन्वनुकू
लत्वस्य गुरुत्वात्। कथं तर्हि पाकानुकूलतायां पतनस्य भासते इति चेत् संसर्गविधयैव हि। कथं तर्हि जानाती
च्छतीयते करोतीत्यादप्रयोगाः॥ नहि ज्ञानाद्यनुकूलो यत्नोऽस्ति प्रतीयते वा विवेदाश्रयतालक्षणत्वमाख्या
तस्येति गदाधराः॥ चिन्तामणिकृतस्तु जानातीत्यादौ धात्वर्थ एव चैत्रादौ साक्षादन्वेति॥ आख्यातस्य
तिपाद्यस्य कालः संख्या च न तु यत्नोऽप्ययोग्यत्वादिस्मात्तु लक्षणेन्॥ नामार्थत्वर्थयोस्साक्षाद्भेदा
न्वयबोधस्याव्युत्पन्नेः॥ अस्य चौदनः पचतीत्यत्रौदनपाकयोः कर्मतासंसर्गेणान्वयः स्यात्॥ वस्तु
तो जानातीत्यादौ आख्यातार्थानवभासे आख्यातार्थसंख्यान्वयो न स्यात्। तस्मादाख्यातार्थविशेष्य
गामित्वात्॥ विनन्नयी विशेषणीभूतो नामार्थ आख्यातार्थविशेष्यः। तेन चैत्र ओदनं पचतीत्यत्र तथाविधैव चैत्र आख्यातार्थविशे

राम

२८

ष्पो न त्वोदनार्थः॥ द्वितीयार्थविशेषणत्वात्॥ पचतइत्यत्र कर्मनकर्तृतृतीयार्थावरुद्धत्वात्॥ स्थीयतइत्यत्र स्थित्यनुकू
ल्पाकृतिरित्यत्राख्यातार्थैकस्यापिन विशेष्यत्वमिति संख्यानन्वितैवेति॥ अतएवौत्सर्गिकमेकवचनमेवेत्यनु
धात्वर्थविशेष्यकोत्रान्वयबोधः॥ न चैवं धात्वर्थस्यद्वित्वादिविवक्षायां द्विवचनाद्यापत्तिः॥ असाधुत्वादित्य
पिकश्चित्॥ स्यादेतत्। आख्यातार्थः कालः कुत्रार्थेन्वेतीति चेत्॥ एकपदोपात्तत्वप्रत्यासत्त्या कृतावित्येवेदिधा
त्वर्थइत्यपरे॥ कथमन्यथाभानातीत्यादौ ज्ञानेवर्तमानत्वादिप्रतीयतेइति॥ स्यादेतत्। भविष्यत्वातीतत्वेष्याख्यात
विशेषवाच्ये॥ भविष्यत्त्वं विद्यमानप्रागभावप्रतियोगित्वं॥ विद्यमानध्वंसप्रतियोगित्वमतीतत्वमिति॥ पचतिचेत्त्रे
भाविकृतिप्रागभावमादायपक्ष्यतीत्याद्यतीतकृतिध्वंसमादायपाक्षीदितिस्यात्॥ न स्यादाद्यकृतिप्रागभावस्यैवभ
विष्यत्त्वरूपेनचरमकृतिध्वंसस्यैवातीतत्वरूपेनाभिधानात्॥ अथौदनंपचतीत्यत्रौदनविषयकविक्लित्तिजनकव्यापा
रविशेषकर्तृत्वंप्रतीयते तत्रविक्लित्तिस्तदनुकूलव्यापारश्चकस्यार्थः॥ उच्यते। विक्लित्तिः फलं तत्र द्वितीयायाअ
र्थस्तदनुकूलोविलक्षणव्यापारोधात्वर्थः॥ अनुकूलताचसंसर्गः॥ ननुकर्मत्वं हि द्वितीयावाच्यं तत्त्वं चक्रियाजन्य

सि॰मं॰ फलशालित्वं न तु फलमात्रमिति चेन्न। क्रियापाधानुवाद्यत्वात्। जन्यत्वाश्रयत्वयोरेव संसर्गमर्यादया लाभात् तत्फ
लमात्र एव शक्तिः कल्प्यते। अनन्यलभ्यो हि शब्दार्थः।। ननु फलमपि धातुलभ्यमेवं फलानुकूलो हि व्यापारो धातु
३० त्वर्थ इति चेन्न। फलानुकूलत्वोपलक्षितो विलक्षणव्यापारो हि धात्वर्थः।। ननु फलानुकूलत्वमपि गौरवात्।। ३०
नन्वेवं त्यजिगम्योः पर्यायता स्यात्।। तथा हि संयोगानुकूलं कर्म गमेरर्थः विभागानुकूलं कर्म त्यजेरर्थः।। तत्र यदि फ
लानुकूलत्वमुपलक्षणं तदा कर्ममात्रं शक्यं तत्र वाच्यं। तथा च कुतो न पर्यायता। अस्तां पर्यायता को दोष इति चेन्न।
ग्रामं गच्छतीतिवत् ग्रामं त्यजतीत्यापत्तेः मैवं।। गच्छतीत्यादिसमभिव्याहृतायाः द्वितीयायाः संयोगफलबोधकत्वव्यु
त्पत्तेः त्यजतीत्यादिसमभिव्याहृताया एव विभागबोधकत्वव्युत्पत्तेरेव। यथोक्तातिप्रसङ्गः निरासात्। न्यायभास्करकृ
तस्तु फलमवच्छेदकमेव द्वितीयार्थस्त्वाश्रयता। न चैवं भूमौ पतत्यत्र भूमिपदात् द्वितीयापत्तिः समभिव्याहृतधात्वर्थ
तावच्छेदकफलाश्रयताबोधकत्वव्युत्पत्तेः।।। अत एव धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति लक्षणं ध्रुवं। न हि कि

क्रियाजन्यफलाश्रयत्वं सत्। वृक्षाद्भूमौ पततीत्यत्र वृक्षभूम्योः कर्मजन्यविभागसंयोगाश्रयतया कर्मत्वापत्तेः॥ ननु [illegible]तवाप्य
धःसंयोगानुकूलव्यापारयत्त्वपर्यन्तपाकर्मत्वं भूमोर्दुस्त्यजमिति चेन्न॥ पतनपर्यन्तफलस्यावच्छेदकत्वानंगीकारात्। तद्धात्व
र्थानधिकरणत्वे सति तद्विशेषणत्वान्न चैत्रस्य धात्वर्थतावच्छेदकफलग्रामसंयोगाश्रयत्वेपि कर्मत्वमिति स्वीकुर्व
न्तीति संक्षेपः॥ तस्य शब्दस्य निराकांक्षादावन्वयाबोधकत्वादाकांक्षादिकं सहकारि तत्र॥ यत्पदं यत्पदेन सह यादृ
शान्वयानुभवजनकं तत्पदस्य तदसमभिव्याहारस्तादृशान्वयबोधे आकांक्षा। भवति हि नामपदमुत्तरवर्त्तिविभक्ति
पदेन सहान्वयबोधकं॥ अतस्तत्समभिव्याहारस्तादृशान्वयाकांक्षा। अत एव घटः कर्मत्वमित्यतो न घटमितिवद
न्वयबोध आकांक्षाविरहात्। धातुपदञ्चाख्यातपदेनैव सहान्वयविशेषबोधकं॥ भवति हि तत्राख्यातपदसमभि
व्याहारस्त्राकांक्षा। अत एवानयनं कृतिरित्यादावानयेतिवन्नान्वयबोधः कृतिबोधकाख्यातसमभिव्याहाराभा
वेन निराकांक्षत्वात्। ननु नामपदं द्वितीयादिविभक्तिसमभिव्याहृतमेव कर्मत्वादीनामाश्रयाश्रयिभावेनान्व

सि. मं.

राम ३१

31

पबोधकमित्यत्र किं नियामकमिति चेन्न ॥ नाम्नः स्वार्थनिष्ठकर्मत्वानुभवजननेन तदुपस्थापकविभक्तिसहकारित्वमि
ति गृहाण ॥ इदं नैवं यस्य ब्रूटः कर्मत्वमित्यादिवाक्येष्वनुत्पत्तिरभूत कुतस्ततोन्वयबोध इति चेन्न । तस्मिन्नुरूपस्यैवमा
नं नास्तिकाकथा तदन्वयबोधे । तथापि यदि कश्चित्तादृशः स्यात्तस्य किं भविष्यतीति चेत् । शाब्दानुभववैधुर्यमेवान्वयव्य
तिरेकसिद्धमाकाङ्क्षाविरहादिति शाब्दानुव्यवशापश्चात्र शाब्दत्वांशे भ्रम एव एतस्याएवाकांक्षापातानं हेतुत्सद्भेराग
न्वयबोधात् ॥ अपरा च प्रकृतान्वयबोधसमानाकारत्वजन्यान्वयबोधविरहः प्रकृतान्वयबोधाकांक्षाजनकं त्वज
न्यान्वयबोधवैधर्म्यविरहात् । एवं च गामानयेत्यतोन्वयबोधे जाते दण्डेनेत्यन्वयबोधे निराकाङ्क्षतास्यात् ॥ अत
उक्तं प्रकृतान्वयबोधसमानाकार इति ॥ न च गामानयेत्यन्वयबोधः प्रकृतो येन दण्डेन गामानयेत्यन्वयबोधस्तेन स
मानाकार इति दिक् ॥ योग्यता च एकपदार्थे अपरपदार्थस्य प्रकृतसंसर्गवत्वं । तेन पयसा सिंचतीति योग्यं पयसि से
कसंसर्गस्य सत्वात् । पयस्येव पयसि सेकसंसर्गो नास्ति तस्मिं एवायोग्यं । आकाशं शब्दः इत्यत्र समवायरूपसंसर्गव

न्वे १

राम ३१

त्वमादायाभेदान्वयबोधेपि योग्यतास्यात्। अत उक्तं श्रुतेति॥ अस्य च ज्ञानं कारणं तद्विमेणाप्यन्वयबोधात्।
न तु संसर्गस्यापूर्वत्वात्॥ कथं प्रथमं ज्ञानं संभवइति चेत्॥ उच्यते। योग्यताया ज्ञानमात्रं हेतुः॥ अस्ति चात्र प्र
सेककरणतावन्न वेति संसायरूपज्ञानं क्वचिन्निश्चयोपि यथाग्न्यसेकेन दृष्टे घटो स्तीति। परे तु। असंसर्गाग्र
हः प्रतिबंधकस्तदद्भावो योग्यतास्वरूपसतीहेतुः॥ नन्वेवं जलह्रदो वह्निमानित्यप्य संसर्गाग्रहस्य लौकिकसन्नि
दर्शायां योग्यंस्यात्। दृष्टत्वात्॥ न च लाघवात्संसर्गज्ञानं कारणं न त्वसंसर्गाग्रहइति वाच्यं॥ असंसर्गाग्रहस्य लौ कर्ष
किकसाक्षात्कारातिरिक्तापि ज्ञानादिदोषाजन्यविशिष्टज्ञानमात्र एव हेतुत्वावधारणात्॥ कथमन्यथा चन्दनन सु
रभीति निश्चये सुरभिचन्दनमिति ज्ञानं न स्यात्। तदभावानुमितावपि चक्षुषा घटस्य लौकिकसाक्षात्कारः॥ शंखे पु
पीतत्वभ्रमश्च दृश्यते इत्यपि जन्यज्ञानं॥ न च घटोभिधेय इत्यत्राभिधेयत्वासंसर्गाप्रसिद्ध्यात् हृदाप्रसिद्धिः॥ अभिधेय
त्वप्रतियोगित्वेन योभावश्चेन्न तदभावस्य प्रसिद्धेः॥ यदि च सोपि न प्रसिद्धस्तदा सोत्र योग्यता हेतुरेव। न चैवं व्यभिचा

सी

सि॰म॰ रान्यात्वबोधं प्रतियोग्यतापाः कथं कारणत्वमिति वाच्यं॥ न हि शाब्दबोधत्वावच्छेदेन योग्यतापाः कारणत्वं किन्तु
तदीयतादृशान्वयबोधे तदीयतादृशान्वयविरहनिश्चयाभावत्वेनैव विशिष्य हेतुत्वमिति व्यभिचार इत्याहुः॥
आसत्तिः पदाव्यवधानं। अजम्बगिरिरग्निमानित्यासन्नं। अनासन्नं गिरिर्भुक्तमग्निमान्देवदत्तेनेति। न चैवं
32 स्थाल्यामोदनं पचतीति स्थाल्यामित्यस्य पाकेनानासन्नतापत्तिः ओदनमित्यनेन व्यवधानादिति वाच्यं।
३२ प्रकृतान्वयबोधानुकूलपदव्यवधानाभावस्य विवक्षितत्वात्॥ ओदनंपदस्य च स्थाल्यधिकरणकोद राम
नकर्मकपाककर्त्रेत्यन्वयबोधानुकूलमेव स्थाल्यां पचतीत्यन्वये च नासन्नमेवेति प्राञ्चः॥ न चैवं श्लो ३२
कादेर्योजनयाप्यन्वयबोधः कथं व्यवहितत्वेन प्रत्यक्षसिद्धः॥ अव्यवहितत्वभ्रमासंभवादिति वाच्यं॥ त
त्र हि श्लोकपदानामन्वयबोधः किन्तु योजनावाक्यादित्याहुः॥ वस्तुतस्तु आकांक्षादिमत्त्वे सति तात्प
र्यज्ञाने व्यवहितेप्यन्वयबोधात्॥ तद्विलम्बेनाविलम्बाच्च॥ न चैवं नैरन्तर्यं न हेतुः॥ किं त्वव्यवहिततात्पर्य

ध्या॰

तानं॥ नचैवंतस्य दमेतत्पदाव्यवहितोत्तरसंभवधानमित्यभिसंधायापीयतु रिष्टा॥ अतएवमौनिश्लोकेप्यासत्तिः
वक्तुरभावेप्यभिसंधायपितुस्साचात्॥ शुकवाक्येचभगवत्तात्पर्यमादायैवगतिरितिनव्याः॥ तदपिन॥स
त्यर्थतात्पर्यसत्तानादावेतद्विलम्बेनशाब्दबोधाविलम्बात्॥ तस्मादव्यवधानेनपदजन्यपदार्थोपस्थितिरासत्तिः
साचस्वरूपसतीहेतुः॥ नहिपदार्थानुपस्थितावन्वयबोधः॥॥ नचव्यवधानेनपदजन्योपस्थितिरभावस्य। घटपदानन्तरम्
वायेनाकाशस्मृतौघटोस्तीतिवाक्यादाकाशान्वयबोधापत्तिः॥ ननुघटमानयेत्यत्रघटकर्मत्वानयन
कृत्यनुपस्थितीनांनयुगपत्संभवः॥ आशुविनाशिनां क्रमिकाणामेलकाभावादितिचेन्न॥ क्रमिक
दानुभवजन्यानेकसंस्कारैर्युगपन्नावत्पदस्मरणाद्युगपन्नावत्पदार्थस्मृतान्वयबोधस्संभवतीतिसंक्षेपः॥॥
अतएवचाव्यवधानेनपदजन्यपदार्थोपस्थितिरासत्तिरित्यपास्तं॥ तृतीयान्तवैयर्थ्यात्। व्यवहितो
पस्थितावेकस्यानुपस्थितेर्विनाशात्। तात्पर्यंचेदं॥ एतस्मिन्नर्थेऽस्यान्वयं प्रत्यापत्तिरितिप्रयोक्तु

सि॰मु॰ मिच्छा।प्रयोक्ता चाभिसंधापयितृमात्रं।ननु वक्तैव मौनिश्लोकेऽव्याप्तेः॥ शुकवाक्ये च भगवद्विषयज्ञा
राम नस्य निश्चयो हेतुः॥ अस्य संशये व्यतिरेकनिश्चये वान्वयबोधात्। तद्भ्रमे चान्वयबोधाच्चेति संक्षेपः॥
सोऽयं शब्दो द्विविधः॥ विधिरर्थवादश्च। तत्र विध्यभिधायकः प्रत्ययस्तद्घटितवाक्यं वा विधिः॥ अत्र विधेयं
३२ विधेश्च कार्यत्वं न तु कृतिसाध्यत्वमिति किमत्र मानमिति चेत्। विधिस्तावत्स्ववर्णैकज्ञानमजनयित्वा राम
प्रवृत्तिजनिकामिच्छामजनयित्वा न प्रवृत्तिजननतापालं॥ अतो यस्य बुद्धिः प्रवृत्तिजननीमिच्छां सूते स वि ३२
धेयपरभिधेयः॥ प्रवृत्तिजननी च कृतिसाध्यत्वप्रकारिकेच्छा। तज्जननी च कृतिसाध्यत्वप्रकारिका बुद्धिः॥ कृ
त्यसाध्यत्वज्ञानेन तदनुत्पत्तेः॥ ननु कृतसाध्यत्वप्रकारकज्ञानाभावो गौरवात्। सर्वदा चिकीर्षोत्पत्त्यापत्तेः
श्च॥ सर्वदा तत्सत्वात्। अतः कृतिसाध्यत्वमेव विध्यर्थ इति। नन्वेवं मरउलीं कुर्यादिति वाक्यादुत्पन्न
कृतिसाध्यताज्ञानवतो बलवदनिष्टजनकमेवं मरउलीकरणं जानतो मरउलीकरणे प्रवृत्तिः स्यात्। अथ बलवद

निष्टाननुबन्धित्वे इति साध्यताज्ञानं प्रवर्त्तकमिति चेदित्थमपीष्टाजनकत्वेन बलवदनिष्टाननुबन्धित्वे इति सा
ध्यत्वेन च मण्डलीकरणज्ञानेन तत्र प्रवृत्तिः स्यात्॥ प्रवृत्तिजनकज्ञानस्य सत्वात्॥ अत्र प्रभाकरमतानु
वर्त्तिनः। नित्ये शौचादिमत्वप्रतिसंधानजन्यं कार्यताज्ञानं प्रवर्त्तकं॥ अन्यत्र चेष्टसाधनताज्ञानजन्य
मिष्टसाधनताज्ञानकालीनं वा कार्यताज्ञानं प्रवृत्तिहेतुः। प्रवृत्तिसामान्ये च कार्यताज्ञानसामान्यमि
ति न कश्चिद्दोषः। नचैवं लाघवादिष्टसाधनत्वविषयककार्यताज्ञानमेव प्रवृत्तिसामान्ये हेतुरिति
वाच्यं। नित्ये तदभावात्॥ साध्यत्वसाधनत्वयोर्विरोधेनैकस्यैकस्मिन्नितिसाध्यत्वेष्टसाधनत्वयो
र्नासंभवात्॥ कथमनयोर्विरोध इति चेदित्थं। साधनत्वं हि सिद्धधर्मः। असिद्धावस्थायां कार्यानु
त्पत्तेः। साध्यत्वञ्चासिद्धधर्मः। सिद्धतादशायां तदभावात्। नचैकदैव सिद्धं चापि नैकदा इति साध्य

सि.मं. मिष्टसाधनं च स्यादिति। अत्र जरन्नैयायिकाः॥ इष्टसाधनताविषयकं हि साध्यताज्ञानमेव लाघवा
न्प्रवर्त्तकं। नत्विष्टसाधनताज्ञानजन्यकार्यताज्ञानादि गौरवात्। नच नित्येइष्टसाधनताज्ञानासंभ
वः फलाभावादिति वाच्यं॥ नित्येप्यवकुशफलश्रुतेः। यत्र फलश्रुतिर्नास्ति तत्रास्तां विश्वजिन्न्यायात्स्व
३४ र्गः फलं प्रत्यवायपरीहारो वा। नचैवं फलकामनाधीनकर्त्तव्यत्वेकाम्यत्वं स्यान्न तु नित्यत्वमिति वाच्यं॥
34 नहि फलकामनानधीनकर्त्तव्यत्वं नित्यतां ब्रूमः। किंतु यदकरणे प्रत्यवायस्तत्वं। तच्च कामनोपाधिकर्त्तव्य ३४
त्वेप्यक्षतमेव॥ नचैवं फले यदि कामना नास्ति तदा संध्यावन्दनादौ प्रवृत्तिर्न स्यादिति वाच्यं। इष्टत्वात्।
नहि प्रयोजनमनुद्दिश्य मन्दोपि प्रवर्त्तते। नन्वेवं कामनाधिकारिविशेषणं स्यात् तथा च यदा फले
कामना नास्ति तदा पुत्रस्य। शुचेरिवानधिकारित्वात्। नित्याकरणेपि प्रत्यवायो न स्यादिति चेत्॥ यदि न

न्नप्रत्यवायप्रसङ्गात्। शाकस्त्वन्मते तर्हि कामनाधिकरणकारिविशेषणम् न तु वेदबोधितमिष्टसाधन
त्वमपि प्रमाणाभावात्। कथमन्यथा कामनेतरयावदधिकारवतामकरणमेव प्रत्यवायहेतुरिति। न किं
चिदेतत्॥ न च साध्यत्वसाधनत्वयोर्विरोधः॥ एकस्मिन्पाके ओदनसाधनत्वकृतिसाध्यत्वयोः स
त्त्वात्॥ कथमन्यथा तत्तदिष्टसाधनताज्ञानकालीनं कार्यताज्ञानं पाकादौ प्रवर्त्तकमिति। कृतिसाध्यत्वे ब
लवदनिष्टाननुबन्धित्वं विशेषणं देयं। नातो मधुविषसंपृक्तान्नभोजने कृतिसाध्यत्वेन सुखसा
धनत्वेन च ज्ञानेपि प्रवृत्तिः॥ बलवदनिष्टानुबन्धित्वेनाग्रहात्। यदा च बलवदनिष्टाननुबन्धित्वेन ज्ञा
यते तदा प्रवर्त्तत एव। एवं च बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यत्वविषयकज्ञानं प्रवर्त्तकं
विध्यर्थोपि बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यत्वं। अत एव कलञ्जभक्षणस्येष्टसा

शि धनत्वेसतिकृतिसाध्यत्वेपिबलवदनिष्टाननुबन्धित्वाभावात्॥ विष्टाभावोस्तीतिनकलंजंभक्षयेदिति
विध्यर्थनिषेधउपपद्यते। कथंतर्हिश्येनेनाभिचरन्यजेतेत्यत्रविधिप्रवृत्तिः॥ श्येनस्यासिंहात्वेननरकरूप
बलवदनिष्टानुबंधित्वादितिचेन्न॥ श्येनोहिवधसाधनं। ननुनरकसाधनंमानाभावात्। श्येनाद्धवधोहि
धाद्धनरकमितिनतत्रास्तिकानाप्रवृत्तिः॥ ननुश्येनोमरणानुकूलव्यापारत्वे नहिंसा। साचनरक ३५
३५ जनिकेतिचेन्न॥ नहिमरणानुकूलव्यापारमात्रंहिंसा। कूपादौविनिष्टेगवितत्कर्तुर्गोवधत्वप्रसंगात्।
३५ नापिमरणोद्देशेनानुष्ठीयमानत्वेसतीतिविशेषितं। गंगामरणमुद्दिश्यपतत्रिसंध्यस्नवपाठादेरपितत्वा
पत्तिः॥ अदृष्टाद्वारामरणानुकूलत्वंविवक्षितमितिचेत्तर्हिकथंश्येनस्यहिंसा[illegible]
त्वमिति। नव्याप्तः। बलवदनिष्टाननुबन्धीष्टसाधनत्वेसतिकृतिसाध्यताज्ञानत्वेनहेतुत्वं। कृतिसा

ध्यत्वे सति बलवदनिष्टाननुबंधीष्टसाधनताज्ञानत्वेन हेतुत्वं॥ बलवदनिष्टाननुबंधिकृतिसाध्य
त्वे सतीष्टसाधनताज्ञानत्वेन वेत्यत्र विनिगमनाविरहः॥ अत एतेनापि रूपेणाहेतुत्वमिति चेत्तर्हि
कार्यताज्ञानत्वादिनैव हेतुतालाघवात्॥ बस्कृतस्कृतेह्कृतिसाध्यताधीत्वेनैव चिकीर्षांप्रतिहेतुत्वमस्तु॥
नन्वेवं मिष्टाजनकेपि चिकीर्षा स्यादिति चेन्न॥ उपायेच्छासाधमान्यसामग्र्यभावात्॥ इष्टसाधन
ताज्ञानं बलवदनिष्टाननुबंधित्वज्ञानञ्च॥ बलवदनिष्टसाधनताज्ञानन्त्वाप्रतिबंधकं॥ इष्टसाधनत्वं
च विद्यमानेच्छाविषयोपायस्तत्साधनत्वं सा च स्वरूपसद्विशेषणं॥ नतु तस्यापि ज्ञानं कारणं॥ एवं च प
दात्कृत्वादौ इष्टापाकादौ च स्कृत्वसाधनताधीस्तदापाकादादृष्टेति ध्येयं॥ विध्यर्थोपि इष्टसाधन
त्वेकृतिसाध्यत्वं बलवदनिष्टाजनकत्वं च न तु विशिष्टं॥ विशेषणविशेष्यभावे विनिगमनाभावात्॥
स्यादेवमस्त्वादौ इष्टाजनकत्वेनज्ञाते मंडलीकरणादौ चिकीर्षा स्यादिति चेन्न॥५

सि० मं०

नकलंजं भक्षयेदित्यत्र च कृतिसाध्यत्वेष्टसाधनत्वयोर्न नञर्थान्वयः तस्य कार्यत्वात् इष्टसाधनत्वात्।
किंतु बलवदनिष्टाननुबंधित्वस्य॥ श्येनेनाभिचरन् यजेतेत्यत्र बलवदनिष्टाननुबंधित्वस्य च नान्वयो बाधात्॥
राम इष्टसाधनत्वकृतिसाध्यत्वयोस्त्वन्वयः स्यादेवाबाधादिति संक्षेपः। सोयं विधिस्त्रिविधः॥ अपूर्वविधिर्नियम
३६ विधिः परिसंख्या चेति। विधिरत्यंतमप्राप्तो नियमः पाक्षिके सति तत्र चान्यत्र च प्राप्ते परिसंख्येति की राम
र्तित इति। उदाहरणानि व्रीहीन्प्रोक्षति व्रीहीनवहंति पंचपंचनखा भक्ष्या इत्यपि। अत्र गुरवः। नेष्टसाधनत्वं वि ३६
ध्यर्थः। स्वर्गकामो यजेतेत्यनेन विधिना तस्य बोधयितुमशक्यत्वात्॥ तथाहि स्वर्गकामस्येष्टसाधनं या
ग इत्यनेन बोध्यं इष्टं चात्र कामत्वेनोपस्थितः स्वर्गश्च। न तद्देशकालसा[illegible]दात्साधनत्वस्याशुविना
शित्वेनासंभवात्। न च परंपरया स्वर्गसाधनत्वं बोध्यं परापदष्टकापूर्वानुपस्थितेः॥ नापि कार्यत्वं॥ स्वर्ग

पं१८

कामकार्यत्वस्य प्रागेवोधयितुमशक्यत्वात्। तथाहि शाब्दे योग्यताज्ञानं हेतुः। योग्यता चान्वयप्रयोजकरूपव
त्त्वं। अत एव सेकान्वयप्रयोजकं द्रवद्रव्यत्वं जलेऽस्तीति तद्योग्यं वह्नौ नास्तीति न तद्योग्यं। प्रकृते च कामिका
र्यत्वान्वये इष्टसाधनत्वं प्रयोजकं न च तद्ग्रहीतुं शक्यमित्युक्तं। तस्मात्कामपूर्वमेव विध्यर्थः। तस्मिंश्च या
गस्य विषयतयान्वयः। नन्वपूर्वस्यापूर्वमनुपस्थितत्वात् तत्र शक्तिग्रहोऽनुपपन्नः। अथ कार्यत्वेन कार्य
सामान्य एव शक्तिग्रहः। योग्यताबला[illegible]त्। उच्यते। कार्यतावत्स्वर्गकामस्यान्वयो नियोज्यनियोजकभा
वलक्षणः। तत्र कामी नियोज्यो नियोजकञ्च कार्यं। अतः कार्ये नियोजकत्वमेव स्वर्गकामस्यान्वयः। नियो
जकत्वञ्च तत्कामिकार्यतयाप्रतीयमानत्वं। अत्र चान्वयप्रयोजकं काम्यसाधनत्वं न हि कामी काम्यादन्य
त्काम्यसाधनत्वेनाज्ञातं कार्यतयावैति। न च काम्यासाधनं काम्यसाधनत्वेन ज्ञायते। अन्यथाख्यातेरन
भ्युपगमात्। न च ज्ञानं काम्यस्य स्वर्गस्य साधनं संभवतीत्यतो योग्यतालाभाग विषयके कार्ये स्वर्गका
पूर्वं यत्नेल्लाभः। न हि यागविषयकमन्यत्कार्यं संभवतीति चेन्न। स्वल्पनादेरपि संभवात्॥५

सि.मं. मीयं स्वर्गकामो यागविषयककार्यवानित्येवं वानुभवो भवन्‌ योग्यतया ऽपूर्वमालम्बते। एवं काम्येऽन्यत्र
शक्तिर्लिङः। नित्ये निषेधे वापूर्वमाह। लोके यचेदित्यादावपूर्वे तात्पर्यासंभवात्‌। कार्यत्वे लक्षणा लिङः॥ अ-
त्रोच्यते। कार्यत्व एव विधेः शक्तिर्लाघवात्‌॥ न च योग्यतानिर्वाहो बाधकः। न ह्यन्वयप्रयोजकरूपवत्त्वं यो- ता२
राम ग्यता सैकानन्वयितापयसत्वात्‌॥ किं तु प्रकृतसंसर्गवत्त्वं॥ तस्य च संशयसाधारणत्वान्न हेतुः॥ न च या-
37 गे स्वर्गकामकार्यत्वस्य संशयो न संभवति येनैवं स्यात्‌। तत्रोक्तं॥ इष्टसाधनत्वेन विध्यर्थः॥ यागेतस्य
३८ लिङा बोधयितुमशक्यत्वादिति तदपि न बाधकाभावात्‌। उक्तं बाधकमिति चेन्न। साक्षात्परस्परा ३८
न्वयमुदस्य साधनतासामान्यस्य लिङा बोधनात्‌॥ यथा रूपवांश्चैत्र इत्यत्र नीलत्वादीन्मुदस्य रूपसामा-
न्येतानं॥ अत्रैकविशेषबाधे शाब्दसामान्यतानं तदितरविशेषप्रकारकतानियतं॥ यथा घटेन जल-
माहरेत्यत्र छिद्रबाधे छिद्रेतरत्वेन घटत्वानमतः। अत्र साक्षात्त्वबाधे परम्परात्वप्रकारकं तानं कार्यं॥
न तु कार्यत्वविशिष्टे॥ न च यागे स्वर्गकामकार्यत्वान्वयानुभवो संभवो बाधकाभावात्‌॥७

तच्च न संभवति द्वारानुपस्थितेरिति चेन्न। घटो न जलमाहरेत्यत्र हि योग्यतया वस्तुतोपः छिद्रेतरत्वदन्वयो न तु तदितर
त्वेन। तदुपस्थापकपदाभावात्। न च लक्षणापातदुपस्थितिर्मानाभावात्। अन्यथान्यत्रापि सातन्त्र्यादिष्टसाधनत्व
घटकारेणैवान्वयः। किन्तु छिन्नमस्त्वत्र यथा योग्यता तान निवारहो बाधकः॥ [नयाहि] अत्राशुविनाशिनः कालान्तरभाविफ
लजनकत्वे फलसमययवर्यन्तस्यापि व्यापारजनकत्वमन्वयप्रयोजकं। न चेह तथा ज्ञानं संभवतीति चेन्न। अन्वयप्रयोजक
रूपवत्त्वस्य योग्यतात्वनिरासात्। नन्वेवं कथमपूर्वलाभ इति चेत्। आशुविनाशिनः कालान्तरभाविफलजनकत्वस्य
तत्कालस्थापिभावव्यापारकत्वमात्रेः। तदुक्तमाचार्यैः॥ चिरध्वस्तं फलायालं न कर्मातिशयं विनेति। [मह्यांत]॥ धर्मिकल्प
नापाल्लघुत्वात्। यागादेरेवस्थापित्वं युक्तं॥ न त्वपूर्वं न चैवमिदानीं यागप्रसक्तता पत्तिः॥ आत्मविशेषगुणानां द्वितीय
क्षणामयोग्यत्वादित्याकलमन्। इदानीं न यजेयमिति प्रत्यक्षविरोधात्। विधिभिन्नोऽर्थवादः॥ स तु त्रिविधः॥ गुणवादोऽ
नुवादो भूतार्थवादश्चेति। तदुक्तं विरोधे गुणवादः स्यादनुवादोऽवधारिते भूतार्थवादस्तद्धीनार्थवादस्त्रिधा मतः॥ सो
यं शाब्दोऽनित्यः। उत्पत्तिगकारो वि निष्टो गकार इति प्रत्यभिज्ञानस्यान्यथानुपपत्तेः॥ न चायमनो बाधकाभावात्॥
प्रतीतेः॥ अत्र गुरवः॥ नित्यशाब्दो व्योमैकगुणत्वात्॥ तत्परिमाणवत्॥ न चात्र प्रयोजकं॥ सोपगकार २

सि॰मं॰ न चोत्पत्त्यादिप्रतीतिर्बाधिका तस्या मञ्जुकवाप्युत्पत्त्यादिविषयकत्वादित्याद्युक्तन्न। गकारस्य गत्वेनोत्पत्त्यादिप्रतीतिः॥
न वा सैवाभ्रान्तिः बाधकाभावात्॥ प्रत्यभिज्ञानं बाधकमिति चेत्सैव बाधिता किं न स्यात्॥ न ह्यत्र विनिगमकमस्ति। न चैवं वि
निगमकाभावाद्विनाशादिप्रत्ययस्यैव कुतोऽबाधितत्वमिति चेन्न। उत्पत्तिवि[illegible]नाशप्रत्ययोरुभयोर्बाध्यत्वकल्पना
राम पेक्षया प्रत्यभिज्ञानमात्रस्य बाध्यत्वकल्पनायां लाघवात्। अथ मे तु विनिग[illegible]मनाभावादुभयोरेव प्रमात्वं कथमेतदिति ३८
३८ चेत्। प्रत्यभिज्ञानस्यापि गत्वावच्छिन्नभेदाभावविषयत्वात्। तथा च सति गकारोत्पत्तिः स्यान्न तु सोऽयमिति चेन्न॥ राम
सोऽयमित्यत्र तद्व्यक्तिगत्वावच्छिन्नाभिन्नोऽयमित्यर्थात्। गकारोत्पत्तिस्तु गत्वेन व्यक्तित्वानवगाहनात्। तथा च सति
तज्जातीयोत्पत्तिः स्यादिति चेन्न। गत्वे जातित्वानवभासनादित्याद्युः॥ न ह्यलम्। शब्दो नित्योऽस्पर्शद्रव्यत्वात्। आत्मवदि
त्याद्युः॥ तदपि न। उक्तदोषात्। शब्दस्य द्रव्यत्वे मानाभावात्। शब्दो [illegible]द्रव्यं साक्षात्सम्बन्धेनेन्द्रियग्राह्यत्वात्॥ घट
वदिति चेन्न। अप्रयोजकत्वात्। शब्दस्य नीरूपद्रव्यत्वेन बहिरिन्द्रियाग्राह्यतापत्तेश्च॥ अथ मे तु वर्णा नित्या घटादयोऽस्य शब्द
त्वात्॥ स्फोटवदित्याद्युः॥ तदपि तत्रैव निरस्तं। दृष्टान्तासिद्धिश्च। न हि वर्णातिरिक्तः स्फोटात्मकः प्रमाणसिद्धोऽस्ति। नन्वलिसः॥ तथाहि

पदानां वर्णावदस्थरूपाणामाशुतरविनाशिनां मेलनासंभवात्॥ अत्र तत्पदत्वं तावन्निरूप्यं॥ तथा च तदपाये
ती०२ कुतोऽर्थप्रत्ययः स्यात्। तस्माद्वर्णाभिव्यंग्यः पदार्थस्फोटः कश्चिदभ्युपेयः॥ यतोऽर्थप्रत्ययप्रवृत्तिः॥ तदसत्तद्धि स्फोटस्ता
वद्वर्णाभिव्यंग्यस्तावत्तांमध्ये यत्किंचिद्वर्णाभिव्यंग्यो वा॥ तावद्वर्णाभिव्यक्तिव्यंग्यो वा नाद्यः॥ आशुविनाशिनां क्रमि
कानां तेषां मेलनासंभवात्॥ नहि द्वितीयः एककारमात्रोच्चारणेऽपि तत्पदस्फोटप्रत्ययेनार्थप्रत्ययापत्तेः॥ वर्णान्त
रवैयर्थ्याच्च॥ नान्त्यः॥ तदसंभवात्॥ अथ पूर्वपूर्ववर्णगोचरसंस्कारसहितश्चरमवर्णोपलंभस्तद्व्यंजक इति
चेत्तर्ह्येवार्थप्रत्यायकोऽस्तु कृतं स्फोटेन॥ अथ पदप्रतीतिवत्तात्संसिद्धिरिति चेन्न॥ तस्य क्रमिकवित्ता न व
तावद्वर्णगोचरत्वात् तावद्वर्णगोचरएव न संभवतीति चेन्न॥ तावद्वर्णगोचरसंस्कारात्समूहालम्बनरूपं ता
न० वद्वर्णगोचरस्मरणसंभवात्॥ ननु तावद्वर्णमात्रं पदं। अर्थाप्रत्ययकत्वात्। अस्य यानदीदीनयोर्विशेषा
पत्तेः॥ किं त्वानुपूर्वीविशेषविशिष्टं तावद्वर्णरूपं। न च तत्प्रत्ययः संभवतीति चेन्न॥ वोनरटत्वं हि इत्यानुपूर्वी॥
अस्ति च तत्प्रत्ययो वोनरंटशब्दोऽमीति प्रतीतेरिति दिक्॥ नन्वर्थोपस्थिरपिमानान्तरं॥ तथा हि पीनो देवदत्तो दि

सि॰मं॰ वानभुंक्त इति प्रत्यक्षपानत्वं। दिवसाभोजिनः पीनत्वं रात्रिभोजनमन्तरेणानुपपन्नमिति तत्कल्पयति। नचात्र प्रत्यक्षादि

प्रमाणं किंतु अनुपपत्तिज्ञानं। सैवार्थापत्तिरिति चेन्न॥ केवलव्यतिरेकीणैवापपन्नेः॥ तथाहि॥ देवदत्तो रात्रौ भुंक्ते दि

वाभुंजानत्वे सति पीनत्वात्॥ यन्नैवं तन्नैवं केवलमभोजीति॥ अर्थापत्ति[illegible] पदं च केवलव्यतिरेकिणामेव नामान्तरमि

२५ ति संक्षेपः॥ अविदितकर्तृकः शब्दविशेष ऐतिह्यं नाम सम्प्रदायमानं तदा शब्द एव नो चेत् प्रमाणमेव नेत्युभययापि राम

नमानान्तरं॥ इति सिद्धं॥ चत्वार्येव प्रमाणानीति। ननु सर्वमिदं प्रमात्वसिद्धौ स्यात्। तदेव नाद्यन्नसिद्धं॥ नहित २५

त्सिद्धं॥ ज्ञानस्यातीन्द्रियत्वात्॥ अन्यथा तेन ज्ञानानां ज्ञानमेव स्यात्॥ ननु विषयान्तरं सञ्चार इति। [illegible] गुरवः॥

स्वप्रकाशमेव ज्ञानं। घटादिस्वात्मानं स्वाधिकरणमा[illegible]त्मानञ्च विषयीकरोति॥

अत एव सर्वमेव ज्ञानं घटमहं जानामीत्याकारकं॥ इत्यञ्च ज्ञानस्य मितिमातृमेयविषयत्वात्॥ त्रिपुटीप्रत्यक्षत्वेनैति

प्रवाद इत्याहुः॥ तन्न॥ चेल्लुर्जन्यज्ञानादिना स्वात्मनो विषयीकर्तुमशक्यत्वात्॥ चाक्षुषादिज्ञाने विषयसन्निकर्षयो

रपि हेतुत्वात्॥ न चोत्पद्यमानं ज्ञानं पूर्वमस्ति सन्निकृष्टञ्चा॥ कथं वा चक्षुषात्मविषयकं ज्ञानं जायते। चाक्षु
षादिज्ञाने उद्भूत... रूपवत्त्वस्य च द्रव्यस्य योग्यत्वात्॥ अन्यथाकाशस्यापि चक्षुषा ग्रहापत्तेः॥ म हात्म॥ ज्ञानं ताव
त्स्वविषये ज्ञाततारूपं फलं जनयतीति निरूढं। तथैवानुमेयं ज्ञानमित्याहुः॥ तदपि न। ज्ञाततापा निरस्तत्वात्॥ ज्ञानरूप
स्य साध्यस्याप्रसिद्धावनुमानासंभवाच्च॥ उच्यते। मनसैव ज्ञानं गृह्यते योग्यत्वात्। न चैवं तज्ज्ञानमपि स्यादेवं तज्ज्ञानमपी
त्यनवस्था। विषयान्तरसंचारसामग्र्या प्रतिबन्धेन कस्यचिज्ज्ञानस्यामनसाग्रहात्॥ तत्रापि बन्धकत्वे किंमान
मिति चेत्॥ फलानुदय एवेति संक्षेपः॥ तथापि तत्स्वप्रामाण्यं केन गृह्यते॥ ननु तदनुमानेन गृहीतु शक्यम
प्रसिद्धेः॥ अत्र म हा॥ ज्ञाततया ज्ञानानुमितिर्ज्ञायमानाप्रामाण्यमपि विषयीकरोतीत्याहुरत्र॥ ज्ञाततयापादि ज्ञानमा
त्रस्य व्याप्तिगृहीता प्रमात्वविशिष्टस्य वा॥ नाद्यः। ततो ज्ञानमात्रं सिध्येत्॥ ननु तत्प्रमात्वमपि साध्यतावच्छेदकं स्या
त्साध्यं व्याप्यासिद्धेः॥ ननु रूपान्तरेणान्यथा वह्निव्याप्तधूमइति ज्ञानानन्तरद्रव्यत्वेन दीपत्वेन वा दहनसिद्ध्यापत्तेः॥

सि.मं. नान्यः॥ व्यभिचारात्॥ साध्याप्रसिद्धेश्च॥ गुरवस्तु। स्वप्रकाशमहिम्ना स्वमिव स्वप्रामाण्यमपि सिद्ध्यतीत्याहुः॥ तेषां
स्वप्रकाशताया अप्रसिद्धेः॥ किञ्चैवं ज्ञानेऽप्रामाण्यसंशयो न स्यात्। ज्ञानग्रहे प्रामाण्यनिश्चयात्। निश्चयेन संशया
योगात्॥ अग्रहे स्वप्रकाशताव्याघातात्॥ धर्मिज्ञानाभावाच्च॥ समानधर्मवत्तया धर्मिज्ञानस्यान्वयव्यतिरेकाभ्यां मं
२८० संशयहेतुतावधारणात्॥ मुरारिमिश्रास्तु। तद्विशेष्यकत्वे सति तत्प्रकारकत्वं प्रामाण्यं। तच्च प्रथमानुव्यव राम
सायेनैव गृह्यते। तथाहि। घटत्ववान्वा व्यवसायोपनीतः॥ अतस्तद्विशेष्यकतासंसर्गरूपा ज्ञाने मनसा गृह्यते॥ २८०
४० विशेषणा[illegible]स्य तद्वतः पूर्वमुपस्थितत्वात्। न च मनसो बहिरर्थाप्रकाशसामर्थ्यं॥ उपनयसहकारेण तस्य ब
हिरर्थप्रकाशकत्वात्। कथमन्यथा कविकाव्यमूलभूतेन ज्ञानेन कथं वानुव्यवसाये विषयभानम्॥ घटत्वमपि व्य
वसायोपनीतं॥ अतस्तत्प्रकारकताविषयतावगृहीतं प्रामाण्यमिति। तदपि न। एवं हि तद्विशेष्यकत्व

तत्प्रकारकत्वं च गृहीतं। न चैवं तावदेव प्रामाण्यम्॥ किंतु तद्वद्विशेष्यकत्वविशिष्टं तत्प्रकारकत्वं। न च तद्विशेष्य
कत्ववैशिष्ट्यमनुव्यवसायो ग्रहीतुमर्हतीति तद्विशेष्यकत्वस्य पूर्वमनुपस्थितेः॥ संसर्गविधया हि विशेष्यताप्रका
रताव भासते॥ किं चैतदपि न प्रामाण्यम्॥ वह्निगुञ्जयोर्गुञ्जावह्नीति भ्रमे तिव्याप्तेः॥ अस्ति हि तत्र वह्निविशेष्य
कत्वं वह्नित्वप्रकारकत्वं च किंतु तद्वद्विशेष्यकत्वावच्छेदेन तत्प्रकारकत्वमित्युक्तं॥ न चावच्छेद्यावच्छेदकभावः
प्रथमं गृहीतुं शक्यः॥ तद्वद्विशेष्यकत्वस्य पूर्वमप्रतीतेः॥ अत्रोच्यते॥ मास्तां प्रमानुव्यवसायेन प्रामाण्य
ग्रहः॥ द्वितीयेन तु स्यात्। तद्वद्विशेष्यकत्वस्य पूर्वं प्रथमानुव्यवसायेनोपस्थितेः॥ न चैवं प्रामाण्यस्यानुव्यव
सायगम्यत्वे प्रामाण्यसंशयो न स्यादिति वाच्यं॥ दोषवशाद्यत्र प्रामाण्यं नानुव्यवसायेन गृहीतं तत्र संशय
संभवात्। अन्यथाप्रसिद्धत्वसंशयो न स्यात्॥ तस्य च चक्षुर्दोषजन्यत्वात्॥ न चैवं प्रामाण्यस्य स्वतोग्राह्यत्व
मागतं॥ असति प्रतिबंधके यावत्स्वाश्रयानुव्यवसायग्राह्यत्वं॥ न च न॥ न प्रथमानुव्यवसायेनाग्रहात्॥ एवं च

सि०मं० साध्यप्रसिद्धेरेवञ्चमाणाममपि तद्बाधकं ॥ तथया ॥ इदं पुरुषत्वज्ञानं प्रमा करादिमत्पुरुषत्वज्ञानत्वात् ॥ यन्नै
वं तन्नैवं यथा घट इति व्यतिरेकी। अन्येतु ॥ प्रथमप्रमाणाभावत्वप्रमाणापव्यतिरेकिणा साध्यं ॥ नच सा
ध्याप्रसिद्धिः ॥ नहि व्यतिरेकिणि साध्यहेत्वोर्व्याप्तिर्गृह्यते। किंतु साध्याभावहेत्वभावयोः ॥ किंतदप्रसिद्धौ न
५१ च साध्याप्रसिद्धौ तदभावाप्रसिद्धिः ॥ प्रतियोगिज्ञानसाध्यात्वाभावज्ञानस्येति वाच्यं ॥ तस्य प्रतियोगिरूपत्वात् ॥
७१ नच प्रतियोगिज्ञानेप्यभावज्ञानं कारणं स्वरूपञ्च व्यापकतया हेत्वभावो गृहीतस्तेन तेन हेतुना तदभावः सि
ध्यति। नच साध्याज्ञाने कथं तद्विशिष्टज्ञानरूपानुमितिः ॥ अप्रमाणाभावविशेष्यकाया एवानुमितेरभ्युप ७१
गमादित्याहुः ॥ अत्रास्तां तावत् ॥ तथापि तद्विशेष्यकत्वे सति तत्प्रकारकत्वग्रहे का गतिः ॥ किंच करादिमत्
पुरुषत्वज्ञानं केन ग्राह्यं। अनुव्यवसायेनेति चेत्तर्हि पुरुषत्ववति तत्प्रकारकग्रहः केन वार्यतां। अतस्तदप्रहा
पटघाकुरस्थ्यादरइति ॥ अन्येतु । तत्प्रकारकज्ञानत्वं प्रमाणापन्नं च रजतत्वप्रकारशुक्तिज्ञानमपि प्रमास्यात्।

तदसिद्धेः॥ नहि पत्र पञ्चास्ति रजतत्वप्रकारकज्ञाने मानमस्ति कथं तर्हि इदं रजतमिति व्यवहार इति चेत्॥ तत्रव्य
वहर्तव्ये रजतत्वासंसर्गाग्रहात्॥ रजतत्वप्रकारकं ज्ञानं प्रमास्थले कारणं क्लृप्तम्॥ तथा च तेन विना क्व शुक्तौ॥
प्रवृत्तिः स्यादिति चेन्न॥ तत्रापि रजतत्वस्यासंसर्गाग्रहस्य हेतुत्वात्॥ अन्यथासंसर्गाग्रहस्याविशेषात्॥ क्वचि
त्संवादिनी प्रवृत्तिः क्वचिद्विसंवादिनीति कुतो नियम इति चेत्॥ तद्वति तदसंसर्गाग्रहस्य तत्प्रकारकसंवादित्वं
तदभाववति तदसंसर्गाग्रहस्य तत्प्रकारकविसंवादित्वं प्रवृत्तौ हेतुत्वात्॥ अत्रोच्यते॥ त्वंवा रजतत्वप्र
कारकप्रवृत्तौ हेतुः॥ रजतं न तु रजतत्वासंसर्गाग्रहो गौरवात्॥ न च शुक्तौ तदसंभवः॥ विशेषणज्ञानं विशेष्ये
न्द्रियसन्निकर्षस्तयोरसंसर्गाग्रहः स्वविशिष्टज्ञानहेतुः॥ अथ रजतत्वेन्द्रियसन्निकर्षविरहात्॥ कथं तत्प्रका
रकप्रत्यक्षमिति चेत्॥ सन्नि[illegible]हितं पत्र[illegible] रजतं तत्र संयुक्तसमवायस्यात्र ज्ञानस्य सन्निकर्षरूपस्य च सत्त्वात्॥
ज्ञानस्य सन्निकर्षत्वे किं मानमिति चेत्॥ रजतत्वप्रकारकप्रत्यक्षमित्यवेहि॥ तन्नैव किं मानमिति चेत्॥ तत्प्रका

न्याय

२३ रिकात्रहत्निरितिद्गतिसंक्षेपः॥ ॥ छ ॥ श्रीशिवे॥ छ ॥ इतिश्रीमहाचार्यचूडामणिकृतायांन्यायसिद्धा
न्तमञ्जर्य्यांशब्दनिछेदः॥ ॥ छ ॥ सम्बद्विविज्ञेशसन्नाख्यमिश्रेलेखितन्नछिवानुचरेण॥ स्थित्वा
स्वर्णावर्त्तीगुरुर्निधिरामसन्नैकिघपाठाप्यभूत्॥ १॥ श्रीनमशिशिवायै[illegible]वायच॥ ~~ह्रीं ह्रीं ह्रीं~~
रारामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामराम छ छ छ छ छ छ छ

श्री
४५० २३